# TAropaniShat from Atharvaveda

# તારોપનિષત્ અથર્વવેદીય

## Document Information

Text title : tAropaniShat from atharvaveda

File name : tAropaniShatatharvaveda.itx

Category : devii, devI, upanishhat, dashamahAvidyA

Location : doc_upanishhat

Proofread by : Lalitha Parameswari parameswari.lalitha at gmail.com, NA

Description-comments : In shAktapramoda and mantramahArNava

Latest update : June 6, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# તારોપનિષત્ અથર્વવેદીય

ૐ

અથ તારોપનિષત્ ।

ૐ તત્સત્ । બ્રહ્મતદ્રૂપં પ્રકૃતિપરં ગગનનાભં તત્પરં
પરમં મહત્સત્યં તદહં હ્રીઙ્કારં રક્તવર્ણં મન્ત્રાભિસ્ત્રીઙ્કારં
પિઙ્ગલાભં હૂઙ્કારં મદ્ધૃદયરૂપં વિશદાભં ભૂમણ્ડલં
ફટ્કારં ધૂમ્રવર્ણં મદ્ખડ્ગમોઙ્કારજ્વલદ્રૂપં મે મસ્તકં
વેદા મદ્ધસ્તાશ્ચન્દ્રાર્કાનલા મન્નેત્રે દિવાનક્તં મત્પાદૌ સન્ધ્યે
મત્કર્ણૌ સંવત્સરો મદુદરં શ્વેતકૃષ્ણપક્ષૌ મત્પાર્શ્વૌ
વાર્તવો મદઙ્ગુલ્યો વિદ્યા મન્નખાઃ પાવકો મન્મુખં મહી મદ્રસના
દ્યૌર્મન્મુખં ગગનં મધૃદયં ભક્તિર્મમ ચર્મરસં મદ્રુધિરં
ચાન્નં વાસાંસિ ફલાનિ નિરહઙ્કારા અસ્થીનિ સુધામન્મજ્જા સ્થાવરાણિ
મદ્રોમાણિ પાતાલાદિલોકૌ મત્કુચૌ બ્રહ્મનાદં મન્નાડ્યો જ્ઞાનં મન્મનઃ
ક્ષમાબુદ્ધિઃ શૂન્યં મદાસનં નક્ષત્રાણિ મદ્ભૂષણાનિ ॥

એતદ્વૈરાટકં મદ્વપુઃ । મદુજ્વલં સત્ત્વં બિન્દુસ્વરૂપં
મહોઙ્કારસ્વરૂપજજ્યોતિર્મયં વિદ્ધિ । શિર ઉગ્રતારાં મહોગ્રાં નીલાં
ઘનામેકજટાં મહામાયાં પ્રકૃતિં માં વિદિત્વા યો જપતિ મદ્રૂપાણિ
યો વેત્તિ મન્મન્ત્રં યો જપતિ મદ્રૂપકલ્પિતાં યો જપતિ મદ્રૂપાણિ યો
વેત્તિ મન્મન્ત્રં યો જપતિ મદ્રૂપકલ્પતાં યો જપતિ ભગં ભજતિ
નિર્વિકલ્પઃ સાધકઃ સદા મદ્રૂપો ભવતિ ॥

સર્વાણિ કર્માણિ સાધ્યાનિ (કૃત્વા) નિર્ભયો ભવતિ । ગુરુન્નત્વા
વસ્ત્રભૂષણાનિ દત્ત્વા ઇમાનુપનિષદ્વિદ્યાં પ્રાપ્ય માં યો જપતિ સ
જીવન્મુક્તો ભવતિ ॥

ઇત્યથર્વવેદે સૌભાગ્યકાણ્ડે તારોપનિષત્સમાપ્તા ॥

Proofread by Lalitha Parameswari parameswari.lalitha at gmail.com

*TAropaniShat from Atharvaveda*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*